।। पाणिनीयं लिङ्गानुशासनम् ।।

मूलसंस्कृतसंहिता

संपादकः

डॉ. नीलेश जोशी

M.A. Sanskrit, NET, SET, Ph.D. व्याकरणशास्त्री

।ग्रन्थ एव गुरुः।

eBook Publication Pvt. Ltd.®

प्रथमावृत्तिः एप्रिल २०१४

।। पाणिनीयं लिङ्गानुशासनम् ।।

मूलसंस्कृतसंहिता

संपादकः

डॉ. नीलेश जोशी

M.A. Sanskrit, NET, SET, Ph.D. **व्याकरणशास्त्री**

।।ग्रन्थ एव गुरुः।।

eBook Publication Pvt. Ltd.®

प्रथमावृत्तिः एप्रिल २०१४

पाणिनीयं लिङ्गानुशासनम्

मूलसंस्कृतसंहिता

संपादक: डॉ. नीलेश जोशी,

वरिष्ठ भाषाशास्त्रज्ञ, IIT मुंबई,

पवई, महाराष्ट्र ४०००७६

प्रथमावृत्ती : रामनवमी, ८ एप्रिल २०१४

प्रकाशक:

eBook Publication Pvt. Ltd.®

4/47, उदय को. हौ. सोसायटी,

आरे रोड, गोरेगाव पश्चिम,

मुंबई, महाराष्ट्र, भारत, ४०००६२

Telephone: +91 7038164022

Email: publicationebook@gmail.com

Website: https://archive.org/details/@ebook_publcation

eBook Terms & Conditions

1. This eBook* may be

a. Distributed without modification or sale.

b. Copied for personal and educational use.

c. Printed for personal and educational use.

2. This eBook* may NOT be

a. Sold individually or as part of package.

b. Modified in any way.

c. Reversed-engineered.

*eBook refers to this PDF and any of its content including pages and images in either electronic or printed form.

अनुक्रमणिका

संपादकीयम्

लिङ्गानुशासनमपि प्राचीनवैयाकरणैः व्याकरण-शास्त्रस्याभिन्नाङ्गं मन्यते। यद्यपीदं पाणिनीयव्याकरणस्य पञ्चममङ्गमिति प्रसिद्धम् तथापि नैके लिङ्गानुशासनम् नाम यत् केनापि व्याकरणशास्त्रेण न सम्बद्धमपि तु सर्वथा स्वतन्त्ररचना मन्यन्ते यथा, हर्षवर्धनस्य वामनस्य च लिङ्गानुशासनम् । वामनहेमचन्द्रहर्षवर्धनादीनां प्रस्थापितैः प्रमाणैः सिद्धं यत् पाणिनेरुत्तरवर्ती प्रसिद्धः संग्रहकारो व्याडि-विरचितं विस्तृतं लिङ्गानुशासनं प्रसिद्धम्[1] । यत् पाणिनीयं लिङ्गानुशासनं सम्प्रति उपलब्धमस्ति अस्य विषये कीथमहोदयस्य इदं मतं सर्वथा अमान्यं यत् इदं इयत्प्राचीनं न सम्भवति[2] यतः पतञ्जलिकात्यायनावपि परिचितौ इदं पुष्यते जिनेन्द्रबुद्धिहरदताभ्यां कथ्यते[3] यत् सूत्ररूपमिदं लिङ्गानुशासनम् । इदं केवलं सूचीमात्रं नात्र लिङ्गभेदविषयकाः दार्शनिकाः अथवा मौलिकाः विचाराः प्रस्तुताः । यद्यपीदं सीमितमूल्यं तथापि भट्ट उत्पलः, रामचन्द्रः, भट्टोजि दीक्षितः, नारायणभट्ट, नारायण सुधी तथा तारानाथतर्कवाचस्पति-आदीनां व्याख्या उपलब्धाः[4]।

---

[1] वामनकृत लिंगानुशासन, श्लोक ३१; हर्षवर्धन-प्रोक्त लिंगानुशासन, श्लोक ८७; हेमचन्द्रविरचित लिंगानु० विवरण, पृ० १०३

[2] सं० सा० इ० हिन्दी अनु०, पृ० ५१३

[3] द्र० मीमांसक, सं० व्या० इ०, पृ० २२६

[4] तत्रैव, पृ० २२७-२२८

लिङ्गानाम् अनुशासनं क्रियतेऽनेनेति लिङ्गानुशासनम् । पाणिनीप्रणीतमस्मिन् शास्त्रे संस्कृतभाषायां व्यवहृतशब्दानां लिङ्गानामुपदेशः।

अस्मिन् शास्त्रे षडधिकाराः वर्तन्ते तेषु १९१ सूत्राणि सन्ति तेषां अधिकरगतं विवरणम् यथा

१. स्त्रीलिङ्गाधिकारः - ३४ सूत्राणि

२. पुँल्लिङ्गाधिकारः - ८३ सूत्राणि

३. नपुंसकलिङ्गाधिकारः - ५५ सूत्राणि

४. स्त्रीलिङ्गपुँल्लिङ्गाधिकारः - ५ सूत्राणि

५. पुँल्लिङ्गनपुंसकलिङ्गाधिकारः - ७ सूत्राणि

६. अविशिष्टलिङ्गाधिकारः - ७ सूत्राणि

वस्तुतः पाणिनीयं लिङ्गानुशासनं त्वष्टाध्यायीग्रन्थस्य परिशिष्टरूपेण न स्वतन्त्ररूपेण प्रकाशितम् | वर्तमाने परिवेशे छात्राणामध्ययनस्य कृते सहायकः भविष्यति | धन्यवादाः व्याह्रियन्ते **eBook Publication Pvt. Ltd.®** संस्थायै प्रकाशनार्थम् |

डॉ. नीलेश जोशी
रामनवमी, ८ एप्रिल २०१४

।। अथ पाणिनीयं लिङ्गानुशासनम् ।।

।। अथ स्त्र्यधिकारः ।।

१. लिङ्गम्।

२. स्त्री।

३. ऋकारान्ता मातृदुहितृस्वसृपोतृननान्दरः।

४. अन्यूप्रत्ययान्तो धातुः।

५. अशनिभरण्यरणयः पुंसि च।

६. मिन्यन्तः।

७. वह्निवृष्ण्यग्नयः पुंसि।

८. श्रोणियोन्यूर्मयः पुंसि च।

९. क्तिन्नन्तः।

१०. ईकारान्तश्च।

११. ऊङाबन्तश्च।

१२. य्वन्तमेकाक्षरम्।

१३. विंशत्यादिरानवतेः।

१४. दुन्दुभिरक्षेषु।

१५. नाभिरक्षत्रिये।

१६. उभावप्यन्यत्र पुंसि।

१७. तलन्तः।

१८. भूमिविद्युत्सरिल्लतावनिताभिधानानि।

१९. यादो नपुंसकम्।

२०. भाःस्रुक्स्रगुदिगुष्णिगुपानहः।

२१. स्थूणोर्णे नपुंसके च।

२२. गृहशशाभ्यां क्लीबे।

२३. प्रावृट्विप्रुड्रुट्विट्त्विषः।

२४. दर्विविदिवेदिस्वनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः।

२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः।

२६. शष्कुलिराजिकुट्यशनिवर्तिभृकुटित्रुटिवलिपङ्क्तयः।

२७. प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः-
संवित्क्षुत्पुन्मुत्समिधः।

२८. आशीर्धूःपूर्गीर्द्वारः।

२९. अप्सुमनस्समासिकताकर्षाणां बहुत्वं च।

३०. रुक्त्वग्ज्योगवाग्यवागूनौस्फिजः।

३१. तृटिसीमासंबध्याः।

३२. चुल्लिवेणिखार्यश्च।

३३. ताराधाराज्योत्स्नादयश्च।

३४. शलाका स्त्रियां नित्यम्।

।। इति स्त्र्यधिकारः ।।

।। अथ पुंलिङ्गाधिकारः ।।

३५. पुमान्।

३६. घञबन्तः।

३७. घाजन्तश्च।

३८. भयलिङ्गभगपदानि नपुंसके।

३९. नङन्तः।

४०. याच्ञा स्त्रियाम्।

४१. क्यन्तो घुः।

४२. इषुधिः स्त्री च।

४३. देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुज-
कण्ठखड्गशरपङ्काभिधानानि।

४४. त्रिविष्टपत्रिभुवने नपुंसके।

४५. द्यौः स्त्रियाम्।

४६. इषुबाहू स्त्रियां च।

४७. बाणकाण्डौ नपुंसके च।

४८. नान्तः।

४९. क्रतुपुरुषकपोलगुल्फमेघाभिधानानि।

५०. अभ्रं नपुंसकम्।

५१. उकारान्तः।

५२. धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्।

५३. समासे रज्जुः पुंसि च।

५४. श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतूलानि नपुंसके।

५५. वसु चार्थवाचि।

५६. मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।

५७. रुत्वन्तः।

५८. दारुकसेरुजतुवस्तुमस्तूनि नपुंसके।

५९. सक्तुर्नपुंसके च।

६०. प्राग्रश्मेरकारान्तः।

६१. कोपधः।

६२. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।

eBook Publication Pvt. Ltd.®

६३. कण्ठकानीकसरकमोदकचषकमस्तकपुस्तक-तडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटक तालकफलकपुलाकानि नपुंसके च।

६४. टोपधः।

६५. किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके।

६६. कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च।

६७. णोपधः।

६८. ऋणलवणपर्णतोरणरणोष्णानि नपुंसके।

६९. कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च।

७०. थोपधः।

७१. काष्ठपृष्ठसिक्थोक्थानि नपुंसके।

७२. काष्ठा दिगर्था स्त्रियाम्।

७३. तीर्थप्रोथयूथगाथानि नपुंसके च।

७४. नोपधः।

७५. जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासन-सोपानमिथुनश्मशान-रत्ननिम्नचिह्नानि नपुंसके।

७६. मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थान-चन्दनालानसमानभवनवसनसंभावनविभावनविमानानि नपुंसके च।

७७. पोपधः।

७८. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके।

७९. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च।

८०. भोपधः।

८१. तलभं नपुंसकम्।

८२. जृम्भं नपुंसके च।

८३. मोपधः।

८४. रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके।

८५. सङ्ग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च।

८६. योपधः।

८७. किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके।

eBook Publication Pvt. Ltd.®

८८. गोमयकषायमलयान्वयाव्ययानि नपुंसके च।

८९. रोपधः।

९०.द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्र भीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्ज राजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरका श्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रव क्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणिनपुंसके ।

९१. शुक्रमदेवतायाम्।

९२. चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गार-भृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च।

९३. षोपधः।

९४. शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके।

९५. यूषकरीषमिषविषवर्षाणि नपुंसके च।

९६. सोपधः।

९७. पनसबिसबुससाहसानि नपुंसके च।

९८. चमसांसरसनिर्यासोपवासकार्पास-
वासमासकासकांसमांसानि नपुंसके च।

९९. कंसं चाप्राणिनि।

१००. रश्मिदिवसाभिधानानि।

१०१. दीधितिः स्त्रियाम्।

१०२. दिनाह्नी नपुंसके।

१०३. मानाभिधानानि।

१०४. द्रोणाढकौ नपुंसके च।

१०५. खारीमानिके स्त्रियाम्।

१०६. दाराक्षतलाजासूनां बहुत्वं च।

१०७. नाड्यपजनोपपदानि व्रणाङ्गपदानि।

१०८. मरुद्गरुत्तरदृत्विजाः।

१०९. ऋषिराशिदृतिग्रन्थिक्रिमिध्वनि-
बलिकौलिमौलिरविकविकपिमुनयः।

११०. ध्वजगजमुञ्जपुञ्जाः।

१११. हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः।

११२. षण्डमण्डकरण्डभरण्डवरण्डतुण्ड-
गण्डमुण्डपाषण्डशिखण्डाः।

११३. वंशाशपुरोडाशाः।

११४. ह्रदकन्दकुन्दबुद्बुदशब्दाः।

११५. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः।

११६. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठ-
मणितरङ्गतुरङ्गगन्धमृदङ्गसङ्गसमुद्गपुङ्खाः।

११७. सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः।

।। इति पुंलिङ्गाधिकारः ।।

।। अथ नपुंसकाधिकारः ।।

११८. नपुंसकम्।

११९. भावे ल्युडन्तः।

१२०. निष्ठा च।

१२१. त्वष्यञौ तद्धितौ।

१२२. कर्मणि च ब्राह्माणादिगुणवचनेभ्यः।

१२३. यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि।

१२४. द्वन्द्वैकत्वम्।

१२५. अभाषायां हेमन्तशिशिरावहोरात्रे च।

१२६. अनञ्कर्मधारयस्तत्पुरुषः।

१२७. अनल्पे छाया।

१२८. राजामनुष्यपूर्वा सभा।

१२९. सुरासेनाच्छायाशालानिशा स्त्रियां च।

१३०. परवत्।

१३१. अपथपुण्याहे नपुंसके।

१३२. संख्यापूर्वा रात्रिः।

१३३. द्विगुः स्त्रियां च।

१३४. इसुसन्तः।

१३५. अर्चिः स्त्रियां च।

१३६. छदि स्त्रियामेव।

१३७. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजल-हलधनान्नाभिधानानि।

१३८. सीरार्थौदनाः पुंसि।

१३९. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च।

१४०. अटवी स्त्रियाम्।

१४१. लोपधः।

१४२. तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि।

१४३. शीलमूलमङ्गलसालकमलतलमुसलकुण्डल-पललमृणालवालनिगलपलालबिडालखिलशूलाः पुंसि च।

१४४. शतादिः संख्या।

१४५. शतायुतप्रयुताः पुंसि च।

१४६. लक्षा कोटिः स्त्रियाम्।

१४७. शङ्कुः पुंसि।

१४८. मन्द्व्यच्कोऽकर्तरि।

१४९. ब्रह्मन् पुंसि च।

१५०. नामरोमणी नपुंसके।

१५१. असन्तो द्व्यच्कः।

१५२. अप्सराः स्त्रियाम्।

१५३. त्रान्तः।

१५४. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव।

१५५. भृत्रामित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि।

१५६. पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च।

१५७. बलकुसुमशुल्बपत्तनरणाभिधानानि।

१५८. पद्मकमलोत्पलानि पुंसि च।

१५९. आहवसंग्रामौ पुंसि।

१६०. आजिः स्त्रियामेव।

१६१. फलजातिः।

१६२. वृक्षजातिः स्त्रियामेव।

१६३. वियज्जगत्सकृच्छकन्पृषच्छकृद्यदुदश्वितः।

१६४. नवनीतावतानानृतामृतनिमित्त-
वित्तचित्तपित्तव्रतरजतवृत्तपलितानि।

१६५. श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्य-
क्ष्यास्यास्पदाकाशकण्वबीजानि।

१६६. दैवं पुंसि च।

१६७. धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्य-
हव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि।

१६८.
द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि।

१६९. अक्षमिन्द्रिये।

।। इति नपुंसकाधिकारः ।।

।। अथ स्त्रीपुंसाधिकारः ।।

१७०. स्त्रीपुंसयोः।

१७१. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः।

१७२. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः।

१७३. गुणवचनमुकारान्तं नपुंसकं च।

१७४. अपत्यार्थस्तद्धिते।

।। इति स्त्रीपुंसाधिकारः ।।

।। अथ पुंनपुंसकाधिकारः ।।

१७५. पुंनपुंसकयोः।

१७६. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः।

१७७. शृङ्गार्घनिदाघोद्यमशल्यदृढाः।

१७८. व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभ्राधर्चदर्भपुच्छाः।

१७९. कबन्धौषधायुधान्ताः।

१८०.
दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः।

१८१. गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च।

।। इति पुंनपुंसकाधिकारः ।।

।। अथाविशिष्टलिङ्गाः ।।

१८२. अविशिष्टलिङ्गम्।

१८३. अव्ययं कतियुष्मदः।

१८४. ष्णान्ता संख्या।

१८५. गुणवचनं च।

१८६. कृत्याश्च।

१८७. करणाधिकरणयोर्ल्युट् च।

१८८. सर्वादीनि सर्वनामानि।

।। इत्यविशिष्टलिङ्गाः ।।

।। इति पाणिनीयं लिङ्गानुशासनं समाप्तम् ।।

अकारादिसूत्रानुक्रमसूची

।। पाणिनीयं लिङ्गानुशासनम् ।।

।। पाणिनीयं लिङ्गानुशासनम् ।।

।। पाणिनीयं लिङ्गानुशासनम् ।।

।। पाणिनीयं लिङ्गानुशासनम् ।।

eBook Publication Pvt. Ltd.®

सन्दर्भग्रन्थसूची

Dalal, C. D. (1918). *वामनप्रणीतं लिङ्गानुशासनं : स्वोपज्ञवृत्तिसमेतम् = Lingānuśāsana of Vāmana : with the author's own commentary.* Central Library, Gaekwad's oriental series no. 6.

Keith, A. B. (1920). *A history of Sanskrit literature.* London: Oxford University Press, London.

Pawate, I. S. (1987). *The structure of the Ashtadhyayi.* Delhi: Amar Prakashan.

Vasu, S. C. (1962). *The Ashṭādhyāyī of Pāṇini.* Delhi: Motilal Banarsidass.

'दर्शनकेशरी', ग. (2008). *अष्टाध्यायी : पदच्छेद–वृत्ति-वार्तिक-टिप्पणी-सहिता* (Vol. चौखम्बा सुरभारती ग्रन्थमाला). (गोपालदत्तपाण्डेयः, Ed.) वाराणसी: चौखम्बा सुरभारती प्रकाशन. Retrieved from http://ci.nii.ac.jp/ncid/BB1766536X

युधिष्ठिर मीमांसक. (2016). *संस्कृत व्याकरण-शास्त्र का इतिहास.* रामलाल कपूर ट्रस्ट.

हेमचन्द्र. (2011). *सिद्धहेमशब्दानुशासनम् : स्वोपज्ञवृत्ति एवं हिन्दी भाषानुवाद सहितम्* (1. संस्करण ed.). प्रतिभ प्रकाशन.

अस्मिन् शास्त्रे षडधिकाराः वर्तन्ते तेषु १९१ सूत्राणि सन्ति तेषां अधिकरगतं विवरणम् यथा

१. स्त्रीलिङ्गाधिकारः - ३४ सूत्राणि

२. पुँल्लिङ्गाधिकारः - ८३ सूत्राणि

३. नपुंसकलिङ्गाधिकारः - ५५ सूत्राणि

४. स्त्रीलिङ्गपुँल्लिङ्गाधिकारः - ५ सूत्राणि

५. पुँल्लिङ्गनपुंसकलिङ्गाधिकारः - ७ सूत्राणि

६. अविशिष्टलिङ्गाधिकारः - ७ सूत्राणि

वस्तुतः पाणिनीयं लिङ्गानुशासनं त्वष्टाध्यायीग्रन्थस्य परिशिष्टरूपेण न स्वतन्त्ररूपेण प्रकाशितम् | वर्तमाने परिवेशे छात्राणामध्ययनस्य कृते सहायकः भविष्यति | धन्यवादाः व्याह्रियन्ते **eBook Publication Pvt. Ltd.®** संस्थायै प्रकाशनार्थम् |

डॉ. नीलेश जोशी
रामनवमी, ८ एप्रिल २०१४

॥ग्रन्थ एव गुरुः॥
eBook Publication Pvt. Ltd.®